श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)

संस्कृतभाषायां अनुवाद्य अनुगृहीतं

श्रीमद्वेदान्ताचार्यविरचितम्

॥ तिरुच्चित्रमालै ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ तिरुच्चिन्नमालै ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमन्मन्त्राधिराजः सकलजनसमुज्जीवकस्य द्वयस्य
द्वात्रिंशद्वर्णभाजः सुमहितभगवद्गीतवाचश्च भावम्।
हंसाग्र्यावासकाञ्चीपुरवरदमहाकाहलीनादमाला
ह्येवंरूपेत्यवादीत् शुभगुणमहितो वेदचूडार्यसूरिः॥ 1 ॥

एकान्तेऽभ्यस्य जप्यं त्रितयमपि रहस्यस्य हृद्यं प्रयच्छन्
अत्यानन्दप्रदाता श्रुतिशिखरगुरुः दानशौण्डः कवीन्द्रः।
"तूप्पुल् श्रीवेङ्कटार्य" स्त्विति महितवचांस्येव तन्नामजुष्टा -
न्यस्माकं जीवनं स्यात् निरवधिकरुणः सन्निधिस्सर्वदाता॥ 2 ॥

पौष्कल्यं विविधं वदन्ति च परिच्छिन्नाष्टवर्णाकृतेः
मन्त्रस्येह सुविस्तरेण च मुदं तन्वन्ति तेषां सताम्।
जन्मावृत्तिमपोह्य पातुरतुलो यः काहलीनिस्स्वनः
देवस्येभगिरीशितुः क्व नु भवेत् अन्यस्य वै तादृशः॥ 3 ॥

****

आयात्प्रेप्सुर्विभूती सुरुचिरसुमजं योऽजमायात्ससर्ज
वायूर्व्यब्रूप आयात् द्युयुतदहनवान् वेदवेद्यस्स आयात्।
दीप्तो नित्यैस्स आयात् शुचिः अमरसुधादश्च रम्यो य आयात्
आयादब्ध्यावृतोर्व्या अवनकृदुरुदयोऽभीष्टदो यश्च आयात्॥ 1 ॥

प्रळयसमय आयात् गोप्तवान् यो हि वेदान्
निगमततिमजायोपादिशत् यस्तदायात्।
श्रुतिविहितसुधर्माध्वाविताऽऽयात् अबाधम्
कमलवसतिलक्ष्म्यादीप्त आयात् पिता नः॥ **2.1**॥

विदध इह गिरं मां स्वं तदर्थं य आयात्
परमकरुणयादात् ऋद्धशास्त्राणि चायात्।
प्रपदनरहितानां मोहको माय्युपायात्
परमपदसमारोहाध्वदर्शी स आयात्॥ **2.2**॥

अखिलभुवनपालः पूर्णकारुण्य आयात्
अधिपतिरिह भूत्वा योऽखिलानां स आयात्।
क्षणमपि न वियुक्तः पद्मया यस्स आयात्
अनितरसदृशो यस्तेजसा देव आयात्॥ **3.1**॥

अदिशदमलवीतिं यः स्मृतो मे स आयात्
अमनुत हृदि जीवास्स्युस्स्थिरा इत्युपायात्।
अयमिव मम चास्याहं प्रियो यस्स आयात्
प्रणव इममुदीर्याऽभ्राजतायात् स्वयं सः॥ **3.2**॥

अस्मासु प्रणमत्सु यस्त्वतिमुदा तत्स्वीकरोत्याययौ
अस्मान् रक्ष्यतयाददान उभयाधीशस्समायात्प्रभुः।
दुर्वृत्ताद्वयमस्मदर्थमिति नस्त्राता समायात्प्रभुः
न ब्रूमश्च न एव चेदमिति यश्चक्रे यथायात्प्रभुः॥ **4.1**॥

क्षेमं संलक्ष्य नो यस्त्वकुरुत भगवद्भक्तभक्तान् स आयात्
कारुण्योत्कर्षतो यस्त्विति दृढशरणो नस्स ईशस्समायात्।
दुष्कर्माणि स्वयं यो हरति करुणया देवराजस्स आयात्
स्वस्मा एवाददानस्स्वयमिह परिचर्यार्थमस्मान् स आयात्॥ **4.2**॥

यस्यान्तर्भुवनानि योऽथ बहिरुद्धान्तस्स आयात्प्रभुः
यत्कायो निखिलं जगत्स्वयमभूत्प्राणस्स आयात्प्रभुः।
सोर्म्यब्धौ शयितोऽन्वभूच्च जगदानन्दं स आयात् हरिः
यो वात्यन्तकृपाळुचक्रमधरत्पाणौ स आयाद्विभुः॥ **5.1**॥

यो रम्यस्तिलकश्रिया शुभतनुश्चायात् स दिव्यः पुमान्
यः पूर्णः सुगुणैस्त्रिभिर्द्विगुणितैः आयात् दयालुर्हरिः।
ज्योतिर्यस्य परं त्वकाशि परिपूर्णानन्द आयात्प्रभुः
सर्वेषां परमा गतिः स भगवान् आयात्स्वयं देवराट्॥ **5.2**॥

यो बन्धद्वयतो विमोचयति नः कारुण्यतश्चागतो
शर्माभासभवोग्रदुःखनिगळात् यो मोचयत्यागतः।
अज्ञानं न यथा भवेदिह च नस्त्राता स आयात्तथा
आयात् यस्सुपथं ददर्श परमं धामाधिरोढुं प्रियः॥ **6.1**॥

पूर्णज्ञानं विशुद्धं परमपदमपि प्राददात् यस्स आयात्
आयान्नो जीवनं यः स्वदृढपदयुगस्याध आकल्पयच्च।
अस्मान् गृह्णाति सर्वान् परिचरणविधौ यः पुमर्थे स आयात्
विश्लिष्टाः स्याम यद्वन्न वयमुरुदयो यस्स्वयं चक्र आयात्॥ **6.2**॥

विश्लेषासहमानलोकजननीकान्तस्स आयात् प्रियः
पादद्वन्द्वमुपायभूतमिति यस्तद्दत्तवान् आगतः।
पूतो यः परमा गतिर्गतिविहीनानां स आयात् दयी
लोको यो हि विराजतोऽतिरुचिरे लक्ष्म्या सहायात्प्रभुः॥ **7.1**॥

विश्वेषामभवत् स्वतश्च परमानन्दस्स आयात् परः
आयादात्मपदद्वये च निदधत् गृह्णाति सेवां स नः।
मध्येऽह्नोऽपि निशां समाह्वयति यश्चित्रक्रियो ह्याययौ
आयात् यो दिनमात्रमस्त्विति निशां प्राणाशयत् स स्वयम्॥ **7.2**॥

दूतस्सन् धर्मराजे प्रहितवति गतो यस्स देवस्समायात्
भारं विश्वंभराया व्यपनिनय हरिर्दुर्भरं यस्स आयात्।
दुर्ज्ञेयं तत्त्वजातं व्यतनुत विशदं वेदराशेस्स आयात्
भीतस्त्वं मां श्रयस्वेत्यवददभयदो यस्स आयात् कृपाळुः॥ **8.1**॥

सर्वे धर्मा य एव स्वयमिति कलयन् सुस्थितो देव आयात्
योऽस्माकं सर्वपापान्यपमृजति परस्स स्वतो देव आयात्।
त्वद्रक्षाधूर्मदीया तदिह वह शुचं मेत्यवोचत्स आयात्
पार्थस्याचोदयत् यो रथमथ वरदस्स स्वयं देव आयात्॥ **8.2**॥

आयात् वञ्चनकारिणीं अगमयत् यः पूतनां पञ्चतां
मल्लान् मत्तगजं ममर्द च बली युध्यन् स आयाद्दयी।
कंसं ध्वंसितवान् अतीव कुपितः वीरो य आयात्परः
फालाक्षस्य पुरोऽच्छिनद्भुजकुलं बाणस्य यश्चाययौ॥ **9.1**॥

मुक्तिं यः प्रददौ दुरुक्त्यघकृते तुष्टाव चायात्प्रभुः
निर्बाधाध्वविचारणत्वर इहायातो य ईशः परः।
यो वा पाण्डुसुतान् ररक्ष विविधैर्मार्गैस्स आयात्प्रभुः
पाञ्चालीचिकुरान् बबन्ध कृपया देवस्स आयात्स्वयम्॥ **9.2**॥

सर्वेशो देवराजः करिगिरिकरुणामूर्तिरायान्महात्मा
सौन्दर्योद्धर्षिवर्ष्मा करितुरगरथारूढ आयात्स देवः।
काञ्च्यामक्ष्णां प्रदाता गतनयननराणां स आयात्परेशः
योऽभीष्टानां वराणां वितरणनिपुणो देवदेवस्स आयात्॥ **10.1**॥

भक्तेभ्यो मुक्तिवृष्टिं वितरति जलमुग्वर्ण आयात्स देवः
नागेन्द्रे मूलमूलेत्यनुरुवति तदुज्जीवकारी स आयात्।
वेद्यां यश्चोत्तरस्यां वरद उदितवान् ब्रह्मयागे स आयात्
देवास्सर्वे भजन्ते पदकमलयुगं यस्य चायात्स्वयं सः॥ **10.2**॥

वेदान्ते प्रणवेऽन्तिमे नम इति ह्युक्तौ चतुर्वर्णके
श्रीमन्नाम्नि मनौ तदन्तगचतुर्थ्यर्थे प्रधाने द्वये।
श्लोकेऽन्त्ये भगवन्मुखोल्लसितवाक्सारे च सारार्थवित्
प्रोक्तं चैतदनुत्तमव्रतदयावद्दैवतेजः परम्॥ **11.1**॥

श्रीचिह्नमालापद्यानि दशाप्यन्तर्हितानि वै।
अल्पानन्दानभीप्सूनां श्रुतिरम्याणि सन्ति हि॥ **11.2**॥

श्रीदेशिकप्रबन्धस्थश्रीकाहळरवस्रजः।
लिलेखार्थं तथा श्लोकान् गोपालो भावगर्भितान्॥ **12**॥

॥ इति काहळीनादमाला समाप्ता॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥